# पञ्चतन्त्रम्

## पञ्चतन्त्रे कथामुखम्

तद्यथा ऽनुश्रूयते। अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्।

तत्र सकलार्थिकल्पद्रुमः प्रवरमुकुटमणिमरीचिमञ्जरीचर्चितचरणयुगल: सकलकलापारंगतो ऽमरशक्तिर्नाम राजा बभूव।

marīci *f, m* – луч солнца;
mañjarī *f* – букет цветов;
carcita p.p. *от* √carcaya – повторять;

तस्य त्रयः पुत्राः परमदुर्मेधसो बहुशक्तिरुग्रशक्तिरनन्तशक्तिश्चेति नामानो बभूवुः।

अथ राजा ताञ्शास्त्रविमुखानालोक्य सचिवानाहूय प्रोवाच।

भोः ज्ञातमेतद्भवद्भिर्यन्ममैते पुत्राः शास्त्रविमुखा विवेकरहिताश्च। तदेतान्पश्यतो मे महदपि राज्यं न सौख्यमावहति।

अथवा साध्विदमुच्यते। (...)

किं तया क्रियते धेन्वा या न सूते न दुग्धदा।

को ऽर्थः पुत्रेण जातेन यो न विद्वान्न भक्तिमान् ॥ ६ ॥

तदेतेषां यथा बुद्धिप्रकाशो भवति तथा को ऽप्युपायोऽनुष्ठीयताम्।

अत्र च मद्दत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती तिष्ठति।

vṛtti *f* - образ действия, поведение, стремление, усердие;

ततो यथा मम मनोरथाः सिद्धिं यान्ति तथा ऽनुष्ठीयताम् इति।

तत्रैक: प्रोवाच। देव द्वादशभिर्वर्षैर्व्याकरणं श्रूयते।

ततो धर्मशास्त्राणि मन्वादीनि अर्थशास्त्राणि चाणक्यादीनि कामशास्त्राणि वात्स्यायनादीनि।

एव च ततो धर्मार्थकामशास्त्राणि ज्ञायन्ते। ततः प्रतिबोधनं भवति।

अथ तन्मध्यतः सुमतिर्नाम सचिवः प्राह।

अशाश्वतोऽयं जीवितव्यविषयः। प्रभूतकालज्ञेयानि शब्दशास्त्राणि।

तत्संक्षेपमात्र शास्त्रं किंचिदेतेषां प्रबोधनार्थं चिन्त्यतामिति। उक्तं च यतः।

saṃkṣepam *adv.* - кратко, сжато;

अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः।

सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात् ॥ ९ ॥

apās (apa√as) IV P. – отбрасывать;
phalgu - ничтожный, незначительный;

तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रपारंगमश्छात्रसंसदि लब्धकीर्तिः।

chātra *m* ученик;
saṃsad *f* – собрание, встреча; множество, большое количество;

तस्मै समर्पयतु एतान्। स नूनं द्राक्प्रबुद्धान् करिष्यति इति।

sam√ar (I P. samṛcchati, *caus.* samarpayati) отдавать, передавать; *caus.* направлять, бросать, отпускать; устанавливать, опускать;
drāk *adv.* – быстро, скоро, тотчас, немедленно;

स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच।

भो भगवन् मदनुग्रहार्थमेतानर्थशास्त्रं प्रति द्रागयथानन्यसदृशान्विदधासि तथा कुरु।

anugraha *m* - милость, любезность, одолжение; услужливость, угодливость;

तदाहं त्वां शासनशतेन योजयिष्यामि। अथ विष्णुशर्मा तं राजानमूचे।

śāsana *n* - приказ, повеление; приглашение; учение; дар, привилегия;

देव श्रूयतां मे तथ्यवचनम्। नाहं विद्याविक्रयं शासनशतेनापि करोमि।

पुनरेतांस्तव पुत्रान्मासषट्केन यदि नीतिशास्त्रज्ञान्न करोमि ततः स्वनामत्यागं करोमि। किं बहुना।

अथासौ राजा तां ब्राह्मणस्यासभाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सादरं तान्कुमारान्समर्प्य परां निर्वृत्तिमाजगाम।

विष्णुशर्मणापि तानादाय तदर्थं मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि चेति पञ्चतन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः।

ते ऽपि तान्यधीत्य मासषट्केन यथोक्ताः संवृत्ताः।

ततः प्रभृत्येतत्पञ्चतन्त्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तम्। किं बहुना।

अधीते य इदं नित्यं नीतिशास्त्रं श‍ृणोति च।
न पराभवमाप्नोति शक्रादपि कदाचन ॥ १० ॥

parābhava *m* – пропадание, исчезновение; распад, разложение; проигрыш, гибель;

॥ इति कथामुखम् ॥